योगवासिष्ठः/प्रकरणम् ५ (उपशमप्रकरणम्)/सर्गः ८९

एकोननवतितमः सर्गः ८९

श्रीवसिष्ठ उवाच ।

वीतहव्यवदात्मानं नीत्वा विदितवेद्यताम् ।

वीतरागभयोद्वेगस्तिष्ठ राघव सर्वदा ।। १

त्रिंशद्वर्षसहस्राणि विजहार यथासुखम् ।

वीतहव्यो वीतशोकस्तथा विहर राघव ।। २

अन्ये च राजन्मुनयो ज्ञातज्ञेया महाधियः ।

यथावसन्स्वराष्ट्रे त्वं तथैवास्व महामते ।। ३

सुखदुःखक्रमैरात्मा न कदाचन गृह्यते ।

सर्वगोऽपि महाबाहो किं मुधा परिशोचसि ।। ४

बहवो विदितात्मानो विहरन्तीह भूतले ।

न केचन वशं यान्ति दुःखस्याङ्ग भवानिव ।। ५

स्वस्थो भव भवोदारः समो भव सुखी भव ।

सर्वगस्त्वं त्वमात्मैव तव नास्ति पुनर्भवः ।। ६

हर्षामर्षविकाराणां जीवन्मुक्ता भवादृशाः ।

न केचन वशं यान्ति मृगेन्द्राः शिखिनामिव ।। ७

श्रीराम उवाच ।

अनेनैव प्रसङ्गेण संशयोऽयं ममोदितः ।

शरत्काल इवाम्भोदं तं मे त्वं तनुतां नय ।। ८

जीवन्मुक्तशरीराणां कथमात्मविदां वर ।

शक्तयो नेह दृश्यन्ते आकाशगमनादिकाः ।। ९

श्रीवसिष्ठ उवाच ।

आकाशगमनादीनि यान्येतानि रघूद्वह ।

प्रमाणिताः पदार्थानां सहजाः खलु शक्तयः ।। १०

यद्विचित्रं क्रियाजालं दृश्यते गम्यते पुनः ।

राम वस्तुस्वभावोऽसौ न तदात्मविदां मतम् ।। ११

अनात्मविदमुक्तोऽपि नभोविहरणादिकम् ।

द्रव्यकर्मक्रियाकालशक्त्या प्राप्नोति राघव ।। १२

नात्मज्ञस्यैष विषय आत्मज्ञो ह्यात्मवान्स्वयम् ।

आत्मनात्मनि संतृप्तो नाविद्यामनुधावति ।। १३

ये केचन जगद्भावास्तानविद्यामयान्विदुः ।

कथं तेषु किलात्मज्ञस्त्यक्ताविद्यो निमज्जति ।। १४

अविद्यामपि ये युक्त्या साधयन्ति सुखात्मिकाम् ।

ते ह्यविद्यामया एव नत्वात्मज्ञास्तथाक्रमाः ।। १५

तत्त्वज्ञोऽवाप्यतत्त्वज्ञो यः कालद्रव्यकर्मभिः ।

यथाक्रमं प्रयतते तस्योर्ध्वत्वादि सिद्ध्यति ।। १६

आत्मवानिह सर्वस्मादतीतो विगतैषणः ।

आत्मन्येव हि संतुष्टो न करोति न चेहते ।। १७

न तस्यार्थो नभोगत्या न सिद्ध्या न च भोगकैः ।

न प्रभावेण नो मानैर्नाशामरणजीवितैः ।। १८

नित्यतृप्तः प्रशान्तात्मा वीतरागो विवासनः ।

आकाशसदृशाकारस्तज्ज्ञ आत्मनि तिष्ठति ।। १९

अशङ्कितोपयातेन दुःखेन च सुखेन च ।

तृप्यत्यपगतासङ्गो जीवेन मरणेन च ।। २०

समुद्रः सरितेवान्तः क्रमसंप्राप्तवस्तुना ।

समेन विषमेणापि तिष्ठत्यात्मानमर्चयन् ।। २१

नैव तस्य कृतेनार्थो नाकृतेनेह कश्चन ।

न चास्य सर्वभूतेषु कश्चिदर्थव्यपाश्रयः ।। २२

यस्तु वाऽभावितात्मापि सिद्धिजालानि वाञ्छति ।
स सिद्धिसाधकैर्द्रव्यैस्तानि साधयति क्रमात् ।। २३
सिद्ध्यतीत्थमिदं युक्त्यैवेत्ययं नियतेः क्रमः ।
त्र्यक्षादिभिः सुरवरैर्व्यर्थीकर्तुं न शक्यते ।। २४
स्वभाव एष वस्तूनां स्वतःसिद्धिर्हि नान्यतः ।
नियतिं न जहात्येव शशाङ्क इव शीतताम् ।। २५
सर्वज्ञोऽपि बहुज्ञोऽपि माधवोऽपि हरोऽपि च ।
अन्यथा नियतिं कर्तुं न शक्तः कश्चिदेव हि ।। २६
द्रव्यकालक्रियामन्त्रप्रयोगाणां स्वभावजाः ।
एतास्ताः शक्तयो राम यद्व्योमगमनादिकम् ।। २७
यथा विषाणि निघ्नन्ति मदयन्ति मधूनि च ।
वमयन्ति च शुक्तानि मदनानि फलानि च ।। २८
तथा स्वभाववशतो द्रव्यकालक्रियाक्रमाः ।
नियतं साधयन्त्याशु प्रयोगं युक्तियोजिताः ।। २९
एतस्मात्समतीतस्य त्यक्ताविद्यस्य राघव ।
आत्मज्ञानस्य नास्त्यत्र कर्तृताकर्तृतानघ ।। ३०
द्रव्यदेशक्रियाकालयुक्तयः साधुसंविदः ।
परमात्मपदप्राप्तौ नोपकुर्वन्ति काश्चन ।। ३१
यस्येच्छा विद्यते काचित्स सिद्धिं साधयत्यलम् ।
आत्मज्ञस्य तु पूर्णस्य नेच्छा संभवति क्वचित् ।। ३२
सर्वेच्छाजालसंशान्तावात्मलाभोदयो हि यः ।
तद्विरुद्धा कथं कस्मादिच्छा संजायतेऽनघ ।। ३३
यथोदेति च यस्येच्छा स तया यतते तथा ।
यथाकालं तदाप्नोति ज्ञो वाप्यज्ञतरोऽपि वा ।। ३४
वीतहव्येन यतितं नो ज्ञानेच्छेन किंचन ।
ज्ञानेच्छेनाशु यतितं प्रोत्थितोऽसौ यथा वने ।। ३५

एवं कालक्रियाकर्मद्रव्ययुक्तिस्वभावजाः ।
यथेच्छमेव सिद्ध्यन्ति सिद्धयः स्वाः क्रमार्जिताः ।। ३६
याः फलावलयो येन संप्राप्ताः सिद्धिनामिकाः ।
तास्तेनाधिगता राम निजात्प्रयतनद्रुमात् ।। ३७
महतां नित्यतृप्तानां तज्ज्ञानां भावितात्मनाम् ।
ईहितं संप्रयातानां नोपकुर्वन्ति सिद्धयः ।। ३८
श्रीराम उवाच ।
अयं मे संशयो ब्रह्मन्वीतहव्यस्य सा तनुः ।
क्रव्यादैर्न कथं भुक्ता कथं क्लिन्ना न भूतले ।। ३९
तदैव वीतहव्योऽसौ कथं वनगतः प्रभो ।
विदेहमुक्ततां शीघ्रं यथावदिति मे वद ।। ४०
श्रीवसिष्ठ उवाच ।
या संविद्वलिता साधो वासनामलतन्तुना ।
सुखदुःखदशादाहभागिनी भवतीह सा ।। ४१
निर्मुक्तवासना शुद्धसंविन्मात्रमयी तु सा ।
तनुस्तिष्ठति तच्छेदे शक्ता नेह हि केचन ।। ४२
श्रृणु युक्त्या कया योगी तनुच्छेदादिविभ्रमैः ।
नाक्रम्यते महाबाहो बहुवर्षशतैरपि ।। ४३
चेतः पदार्थे पतति यस्मिन्यस्मिन्यदा यदा ।
तन्मयं तद्भवत्याशु तस्मिंस्तस्मिंस्तदा तदा ।। ४४
तथा दृष्टारि हि मनो विकारमुपगच्छति ।
दृष्टमित्रं सुहृद्यत्वं स्वयमित्यनुभूयते ।। ४५
रागद्वेषविहीने तु पथिके पादपे गिरौ ।
भवत्यरागद्वेषं च स्वयमित्यनुभूयते ।। ४६
मृष्टे लौल्यमुपादत्ते दुर्भोज्ये याति निःस्पृहम् ।

वैरस्यं याति कटुनि स्वयमित्यनुभूयते ।। ४७

समसंविद्विलासाढ्ये यद्यदा यतिदेहके ।

हिंस्रचेतः पतत्याशु समतामेति तत्तदा ।। ४८

समसङ्गविमुक्तत्वाच्छेदादौ न प्रवर्तते ।

पान्थो व्यर्थं पथि ग्रामे यथा ग्रामीणकर्मणि ।। ४९

योगिदेहसमीपात्तु गत्वा प्राप्नोति हिंस्रताम् ।

यद्यद्भवति तत्राशु तथारूपं न संशयः ।। ५०

इति हिंस्रैर्मृगव्याघ्रसिंहकीटसरीसृपैः ।

न च्छिन्ना वीतहव्यस्य तनुर्भूतलशालिनी ।। ५१

सर्वत्र विद्यते संवित्काष्ठलोष्टोपलादिके ।

सत्तासामान्यरूपेण संस्थिता मूकबालवत् ।। ५२

पोप्लूयमाना तरला केवलं परिदृश्यते ।

तन्वी पुर्यष्टकेष्वेव प्रतिबिम्बजलेष्विव ।। ५३

तेन भूजलवाय्वग्निसंवित्त्या समरूपया ।

निर्विकारं तनुर्नीता वीतहव्यस्य राघव ।। ५४

अन्यच्च श्रृणु मे राम स्पन्दो नाशस्य कारणम् ।

विकारः स च चित्तोत्थो वातजो वा जगत्स्थितौ ।। ५५

प्राणानां प्राणनं स्पन्दस्तच्छान्तौ ते दृषत्समाः ।

यतः स्थिता धारणया तेनानष्टास्य सा तनुः ।। ५६

सबाह्याभ्यन्तरं स्पन्दश्चित्तजो वातजोऽथवा ।

न यस्य विद्यते तस्य दूरस्थौ प्रकृतिक्षयौ ।। ५७

सबाह्याभ्यन्तरे शान्ते स्पन्दे तत्त्वविदां वर ।

धातवः संस्थितिं देहे न त्यजन्ति कदाचन ।। ५८

संशान्ते देहप्रस्पन्दे चित्तवातमये तथा ।

धातवो मैरवं स्थैर्यं यान्ति संस्तम्भितात्मकाः ।। ५९

तथा च दृश्यते लोके स्पन्दशान्तौ दृढा स्थितिः ।

दारूणामिव धीराणां शवाङ्गानामचोपता ।। ६०

इति वर्षसहस्राणि देहा जगति योगिनाम् ।

न क्लिद्यन्ते न भिद्यन्ते मग्नवज्जलदा इव ।। ६१

तदैव वीतहव्योऽसौ श्रृणु किं नोपशान्तवान् ।

देहमुत्सृज्य तत्त्वज्ञो ज्ञातज्ञेयवतां वरः ।। ६२

ये हि विज्ञातविज्ञेया वीतरागा महाधियः ।

विच्छिन्नग्रन्थयः सर्वे ते स्वतन्त्रास्तनौ स्थिताः ।।६३

दैवं वापि च कर्माणि प्राक्तनान्यैहिकानि च ।

वासना वा न तेषां तच्चेतो नियमयन्त्यलम् ।। ६४

तेन तत्त्वविदां तात काकतालीयवन्मनः ।

यद्यद्भावयति क्षिप्रं तत्तदाशु करोत्यलम् ।। ६५

काकतालीययोगेन वीतहव्यस्य संविदा ।

सांप्रतं जीवितं बुद्धं तदेवाशु स्थिरीकृतम् ।। ६६

यदा तु तस्य प्रतिभा विदेहोन्मुक्ततां गता ।

तदा विदेहमुक्तोऽभूदसौ स्वातन्त्र्यसंस्थितिः ।। ६७

विगतवासनमाशु विपाशता-

मुपगतं मन आत्मतयोदितम् ।

यदभिवाञ्छति तद्भवति क्षणा-

त्सकलशक्तिमयो हि महेश्वरः ।। ६८

इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मीकीये दे० मोक्षोपायेषूपशमप्रकरणे सद्विलासविचारयोगोपदेशो

नामैकोननवतितमः सर्गः ८९